Roll No. :

कुल प्रश्नों की संख्या : 18 ]
Total No. of Questions : 18 ]

[ कुल मुद्रित पृष्ठों की संख्या : 8
[ Total No. of Printed Pages : 8

# H-251090–C

## विषय : संस्कृत

## Subject : Sanskrit

समय : 3 घण्टे ]
Time : 3 hours ]

[ पूर्णांक : 75
[ Maximum Marks : 75

**निर्देश** : (i) सर्वे प्रश्नाः समाधेयाः।
(ii) सुन्दरं सुस्पष्टञ्च लिखत।

**प्रश्न-1** **( खण्ड-अ )** उचितं विकल्पं चित्वा लिखत— [1×5=5]

(i) 'अहं करोमि' इति पदस्य सन्धिः अस्ति—

(क) अहण् करोमि (ख) अहम् करोमि
(ग) अहङ् करोमि (घ) अहन् करोमि

(ii) 'दैव्यै सरस्वत्यै नमः' अत्र का विभक्तिः अस्ति—

(क) चतुर्थी विभक्तिः (ख) तृतीया विभक्तिः
(ग) द्वितीया विभक्तिः (घ) पञ्चमी विभक्तिः

(iii) भिन्न प्रकृतिकं पदं चिनुत—

(क) यज्ञवचः (ख) वसन्तः
(ग) शिशिरः (घ) ग्रीष्मः



https://www.cgboardonline.com

(iv) "मूषकं <u>गृहीत्वा</u> मार्जारः धावति।" रेखाङ्कित पदे प्रत्ययः अस्ति—

(क) त्व (ख) तुमुन्

(ग) क्त (घ) क्त्वा

(v) 'परितः' योगे विभक्तिः भवति—

(क) प्रथमा (ख) द्वितीया

(ग) तृतीया (घ) चतुर्थी

**प्रश्न-1 (खण्ड-ब)** उचितं विकल्पं चित्वा रिक्तस्थानानि पूरयत वाक्यं पुनः लिखत— [1×5=5]

[ अपि, उपसर्गः, इदानीं, वीरगतिं, 1989 ]

(i) 'सुनयति' इति पदे 'सु' ——— अस्ति।

(ii) ——— कुशलिनः भवन्तः।

(iii) सा राज्य रक्षां कुर्वती ——— प्राप्तवती।

(iv) बालकाः ——— क्रीडा क्षेत्रे क्रीडन्ति।

(v) स्वामी आत्मानन्दः ——— तमे वर्षे निर्वाणं प्राप्य ब्रह्मलीनश्चा भवत्।

**प्रश्न-1 (खण्ड-स)** उचितं स्तम्भं सुमेलनं कुरुत— [1×5=5]

| | ('क' स्तम्भम्) | ('ख' स्तम्भम्) |
|---|---|---|
| (i) | काः | - रामायणम् |
| (ii) | हेमन्त-वर्णनम् | - प्रथमः विभक्ति बहुवचनम् |
| (iii) | बहिः योगे | - भारतीय अन्तरिक्ष अनुसन्धान संगठन |
| (iv) | उदरेषु | - पञ्चमी विभक्तिः |
| (v) | इसरो | - सप्तमी विभक्तिः बहुवचनम् |



https://www.cgboardonline.com

प्रश्न-2 निम्नलिखितयोः अङ्कयोः संस्कृतभाषया लिखत— [1×2=2]

(क) 130 (ख) 149

प्रश्न-3 निम्न रेखाङ्कित पदयोः संधि-विच्छेदं कृत्वा लिखत— [1×2=2]

(क) मनोहरः मधुरं गायति।

(ख) कार्तिकस्य नाम षडाननः अपि अस्ति।

प्रश्न-4 निम्न रेखाङ्कित पदयोः प्रकृतिं प्रत्ययं च योजयित्वा लिखत— [1×2=2]

(क) उषा खाद् + क्त्वा भ्रमति।

(ख) सत्संगतिः सर्वत्र दुर्लभ + टाप्।

प्रश्न-5 यथानिर्देशं वाच्यं परिवर्तयत— [1×2=2]

(क) शिष्याः गुरून् नमन्ति। (कर्मवाच्ये)

(ख) मया त्वं दृश्यसे। (कर्तृवाच्ये)

प्रश्न-6 समासविग्रहं कृत्वा लिखत— [1×3=3]

(क) दिगम्बरः

(ख) प्रतिदिनम्

(ग) ज्ञानहीनः

प्रश्न-7 अधोलिखितानि वाक्यानि संशोध्य लिखत— [1×3=3]

(क) सः कुत्र गच्छन्ति?

(ख) एकदा एकः वृद्धा अपतत्।

(ग) सुशीला पुस्तकं पठितवान्।

प्रश्न-8 निर्देशानुसारं लकार-परिवर्तनं कृत्वा लिखत— [1×3=3]

(क) वयं न क्रुध्याम। (लट्लकारे)

(ख) बालिकाः लिखन्ति। (लङ्लकारे)

(ग) छात्री नृत्यताम्। (लोट्लकारे)



https://www.cgboardonline.com

**प्रश्न-9** अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारेण प्रदत्त प्रश्नानाम् उत्तराणि लिखत— [1×3=3]

अरपाया: तटे एक: लघुग्राम: आसीत्। परसू अरपानद्यां प्रतिदिनं मत्स्याखेटं करोति स्म। कालान्तरेण तस्य भार्या बैसाखा एकां स्वस्थां बालाम् अजनयत्। सा बालिका लावण्यवती आसीत्। लावण्येन तस्या: 'बिलासा' इति नामकरणमभवत्।

**प्रश्ना:—**

(क) "परसू प्रतिदिनं मत्स्याखेटं करोति स्म" इति वाक्यस्य हिन्दी-अनुवादं कुरुत।

(ख) 'नामकरणमभवत्' इति पदे क्रियापदम् किं अस्ति?

(ग) गद्ये 'पत्नी' इति पदस्य पर्यायपदं किं प्रयुक्तम्?

**प्रश्न-10** अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारेण प्रदत्त प्रश्नानाम् उत्तराणि लिखत— [1×3=3]

कश्चन् निर्धनो जन: भूरि परिश्रम्य किञ्चद् वित्तमुपार्जितवान्। स: स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दातुं सफलो जात:। तत्तनय: तत्रैव छात्रावासे निवसन् अध्ययने संलग्न: समभूत्। एकदा स पिता तनुजस्य रुग्णतामाकर्ण्य व्याकुलो जात:।

**प्रश्ना:—**

(क) "पिता तनुजस्य रुग्णतामाकर्ण्य व्याकुलो जाता:" इति वाक्यस्य हिन्दी-अनुवादं कुरुत।

(ख) जन: कथं वित्तमुपार्जितवान्?

(ग) गद्ये 'धनहीन:' इति पदस्य पर्यायपदं किं प्रयुक्तम्?

**प्रश्न-11** अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत— [1×3=3]

नास्ति विद्यासमं चक्षु: नास्ति सत्यसमं तप:।
नास्ति रागसमं दु:खं नास्ति त्यागसमं सुखम्॥

**प्रश्ना:—**

(क) "नास्ति सत्यसमं तप:" वाक्यस्य हिन्दीभाषया अनुवादं लिखत।



https://www.cgboardonline.com

(ख) 'नेत्रम्' इति पदस्य पर्यायपदं किं प्रयुक्तम्?

(ग) 'सुखम्' इति पदस्य विलोमपदं लिखत।

**प्रश्न-12** अधोलिखितं श्लोकं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत— [1×3=3]

अज्ञानेनावृत्तो लोकस्तमसा न प्रकाशते।
लोभात् त्यजति मित्राणि सङ्गात्स्वर्गं न गच्छति॥

**प्रश्नाः—**

(क) "अज्ञानेन आवृत्तः लोकः" इति वाक्यस्य हिन्दी अनुवादं कुरुत।

(ख) "सङ्गात् स्वर्गं न गच्छति।" अस्मिन् वाक्ये क्रियापदं किं प्रयुक्तम्?

(ग) 'संसारः' इति पदस्य पर्यायपदं श्लोके प्रयुक्तम्।

**प्रश्न-13** अधोलिखितानां प्रश्नानामुत्तराणि संस्कृतभाषया लिखत (केषाञ्चित् चतुर्णाम्)— [1×4=4]

(क) कयोः मध्ये मित्रता अभवत्?

(ख) दीपमालिकापर्वणि कस्य शब्दः श्रूयते?

(ग) कतिधा मङ्गलयानस्य मार्गः परिवर्तितः?

(घ) कः वंशम् आख्याति?

(ङ) केन न प्रकाशते?

(च) के रोगाणाम् अपहारकाः?

**प्रश्न-14** अधोलिखितेषु वाक्येषु रेखाङ्कित पदमाधृत्य प्रश्न-निर्माणं कुरुत— [1×4=4]

(क) <u>पुत्रं</u> द्रष्टुं सः प्रस्थितः।

(ख) <u>प्राणेभ्यः</u> अपि प्रियः सुहृद्।

(ग) <u>उभौ</u> शवं चत्वरे स्थापितवन्तौ।

(घ) <u>तृणानाम्</u> अग्निना सह विरोधः भवति।



https://www.cgboardonline.com

**अथवा**

अधोलिखितानां प्रश्नानाम् उत्तराणि हिन्दीभाषया लिखत—

(क) शृगालः वधूं किं निर्देशितवान्?

(ख) वृक्षाः प्राणिनां कथम् उपकुर्वन्ति?

(ग) हेमन्तकाले किं सुखावहं भवति?

(घ) 'ओदनं सूक्तं' कस्मात् वेदात् उद्धृतः?

**प्रश्न-15** स्वपाठ्यपुस्तकात् चतस्रः सूक्तयः लिखत याः अस्मिन् प्रश्नपत्रे नागताः स्युः। [1×4=4]

**अथवा**

अधः प्रदत्तानां सूक्तीनां हिन्दीभाषया भावार्थं लिखत—

(क) अत्यादरः शंकनीयः।

(ख) छिद्रेष्वनर्थाः बहुली भवन्ति।

(ग) समानशीलव्यसनेषु सख्यम्।

(घ) परिवारः लघु एव वरम्।

**प्रश्न-16** स्वपाठ्यपुस्तकात् कौचित् द्वौ सुभाषित श्लोकौ लिखत यौ अस्मिन् प्रश्न-पत्रे न समागतौ स्याताम्। https://www.cgboardonline.com [$2\frac{1}{2}$×2=5]

**अथवा**

अधः द्वौ अपूर्णौ सुभाषित श्लोकौ प्रदीयते, तौ श्लोकौ स्वपाठ्य-पुस्तकाधारेण पूरयत—

(क) वायुनां शोधकाः वृक्षाः ——।
—— रक्षणं च हितावहम्॥

(ख) उद्यमः साहसं धैर्यं, —— ।
—— देवः सहायकृत्॥

**प्रश्न-17** (अ) भवतः नाम राजेशः अस्ति। भवतः विद्यालयस्य नाम शासकीयः उच्चतरः माध्यमिकः विद्यालयः विलासपुरम् अस्ति। स्वस्य अपरिहार्य कारणात् अवकाशस्य हेतोः स्वप्राचार्यं प्रति एकम् आवेदनं पत्रं लिखतु। [1+2+1=4]



https://www.cgboardonline.com

**अथवा**

भवतः नाम दीपेशः अस्ति। भवान् अधोलिखितां मञ्जूषां दृष्ट्वा शुल्क मुक्त्यर्थं लिखते अस्मिन् पत्रे रिक्तस्थानानि पूरयन् आवेदनं पत्रं लिखतु—

[$\frac{1}{2}$×8=4]

[ आशा से, पञ्चम्यां, पञ्चसहस्त्ररूप्यकाणि, निवेदनम्, अनुग्रहीष्यति, निर्वाहः, शुल्क मुक्तये, छात्रः ]

सेवायाम्

श्रीमान् प्राचार्यः महोदयः

शासकीयः उच्चतरः माध्यमिकः

विद्यालयः बिलासपुरम् (छत्तीसगढम्)

विषयः— (i) —— प्रार्थनापत्रम्।

महोदय!

सविनयं (ii) —— अस्ति। यदहं भवतः विद्यालये दशमकक्षायाः (iii) —— अस्मि। मम पिता एकः कृषकः अस्ति। तस्य मासिकः आयः (iv) —— अस्ति। मम एकः भ्राता अष्टमकक्षायां भगिनी च (v) —— कक्षायां पठति। अस्माकं कुटुम्बस्य (vi) —— अतीव काठिन्येन भवति।

अतः शुल्कमुक्त्यर्थं प्रार्थयेऽहम्। (vii) —— अत्र भवान् मम एतां प्रार्थनां स्वीकृत्य (viii) ——।

भवतः विनीतः शिष्यः

दिनाङ्कः—

दीपेशः

कक्षा-दशमी



https://www.cgboardonline.com

(ब) अधोलिखितम् अपठितांशं पठित्वा निर्देशानुसारेण संस्कृतभाषया उत्तरत— [1×4=4]

संसारे कोऽपि बालः न जानाति यत् किं सद्वृत्तं किं च असद्वृत्तम्। बालस्तु ज्येष्ठान् वृद्धान् च पश्यति। ते वयोवृद्धाः यथा-यथा आचरन्ति बालोऽपि तथैव आचरति। शिष्टानां वंशेषु वृद्धाः युवानः बालाः महिलाश्च सर्वे परस्परं सभ्यतायाः आलपन्ते ते अन्योन्यं सम्मानयन्ति। अशिष्टानां वंशेषु तु एतादृशः व्यवहारः न दृश्यते।

**प्रश्नाः—**

(क) संस्कृतभाषायां सारांशं लिखत।

**अथवा**

(क) केषां वंशेषु सर्वे सभ्यतायाः आलपन्ते?

(ख) उचितं शीर्षकं लिखत।

**अथवा**

(ख) बालः कान्-कान् पश्यति?

(ग) 'सदाचारणम्' इत्यर्थे अत्र कः शब्दः प्रयुक्तम्?

(घ) 'ते' इति कर्तृपदस्य किं क्रियापदम् अत्र प्रयुक्तम्?

**प्रश्न-18** अधः प्रदत्तेषु विषयेषु कमपि एकमधिकृत्य संस्कृतभाषया द्वादश वाक्यैः निबन्धं लिखत— [$\frac{1}{2}$×12=6]

(क) सदाचारः

(ख) महाकविः कालिदासः

(ग) सुभाषचन्द्रः

(घ) मम प्रदेशः (छत्तीसगढः)

• • •



https://www.cgboardonline.com